### (13) वंशस्थविल

( Also called वंशस्थ and वंशस्तनित ).

Def. वदन्ति वंशस्थविलं जतौ जरौ ।
Sch. G. ज, त, ज, र (5. 7).
Ex. तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता ॥ Ku. 5. 1.

See R. 3 also.

### (14) वैश्वदेवी

Def. बाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ।
Sch. G. म, म, य, य (5. 7).
Ex. अर्चामन्येषां त्वं विहायामराणा-
मद्वैतेनैकं विष्णुमभ्यर्च्य भक्त्या ।
तत्राशेषात्मन्यर्चिते भाविनी ते
भ्रातः संपन्नाराधना वैश्वदेवी ॥

### (15) स्रग्विणी

Def. कीर्तितैषा चतूरेफिका स्रग्विणी ।
Sch. G. र, र, र, र (6. 6).
Ex. इन्द्रनीलोपलेनेव या निर्मिता
शातकुम्भद्रवालङ्कृता शोभते ।
नव्यमेघच्छविः पीतवासा हरे-
र्मूर्तिरास्तां जयायोरसि स्रग्विणी ॥

See Śi. 4. 42.

—

*Metres with 13 syllables in a quarter*

## ( अतिजगती )

### (1) कलहंस

( Also called सिंहनाद and कुटजा ).

Def. सजसाः सगौ च कथितः कलहंसः ।
Sch. G. स, ज, स, स, ग (7. 6).
Ex. यमुनाविहारकुतुके कलहंसो
व्रजकामिनीकमलिनीकृतकेलिः ।
जनचित्तहारिकलकण्ठनिनादः
प्रमदं तनोतु तव नन्दतनूजः ॥

See Śi. 6. 73.

### (2) क्षमा

( Also called चन्द्रिका and उत्पलिनी ).

Def. तुरगरसयतिर्नौ ततौ गः क्षमा ।
Sch. G. न, न, त, त, ग (7. 6).
Ex. इह दुरधिगमैः किंचिदेवागमैः
सततमसुतरं वर्णयन्त्यन्तरम् ।
अमुमतिविपिनं वेद दिग्व्यापिनं
पुरुषमिव परं पद्मयोनिः परम् ॥ Ki. 5. 18.

### (3) प्रहर्षिणी

Def. त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम् ।
Sch. G. म, न, ज, र, ग (3. 10).
Ex. ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ R. 4. 88.

See Ki. 7; Śi. 8.

### (4) मञ्जुभाषिणी

( Also called सुनन्दिनी and प्रबोधिता ).

Def. सजसा जगौ च यदि मञ्जुभाषिणी ।
Sch. G. स, ज, स, ज, ग (6. 7).
Ex. यमुनामतीतमथ शुश्रुवानमुं
तपसस्तनूज इति नाधुनोच्यते ।
स यदाऽचलन्निजपुरादहर्निशं
नृपतेस्तदादि समचारि वार्तया ॥ Śi. 13. 1.

### (5) मत्तमयूरम्

Def. वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम् ।
Sch. G. म, त, य, स, ग (4. 9).
Ex. दृष्ट्वा दृश्यान्याचरणीयानि विधाय
प्रेक्षाकारी याति पदं मुक्तमपायैः ।
सम्यग्दृष्टिस्तस्य परं पश्यति यस्त्वां
यश्चोपास्ते साधु विधेयं स विधत्ते ॥ Ki. 18. 28.

Śi. 4. 44; 6. 76; also R. 9. 75.

### (6) रुचिरा

( Also called प्रभावती ).

Def. जभौ सजौ गिति रुचिरा चतुर्ग्रहैः ।
Sch. G. ज, भ, स, ज, ग (4. 9).
Ex. कदा मुखं वरतनु कारणादृते
तवागतं क्षणमपि कोपपात्रताम् ।
अपर्वणि ग्रहकलुषेन्दुमण्डला
विभावरी कथय कथं भविष्यति ॥ M. 4. 16.

See Bk. 1. 1; Śi. 17.

—

*Metres with 14 Syllables in a quarter*

## ( शक्वरी )

### (1) अपराजिता

Def. ननरसलघुगैः स्वरैरपराजिता ।
Sch. G. न, न, र, स, ल, ग (7. 7).
Ex. यदनवधिभुजप्रतापकृतास्पदा
यदुनिचयचमूः परैरपराजिता ।
व्यजयत समरे समस्तरिपुव्रजं
स जयति जगतां गतिर्गरुडध्वजः ॥